राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली

## अष्टचत्वारिंशी अखिलभारतीया शास्त्रीया स्पर्धा

2010तमे वर्षे नवम्बरमासान्ते/दिसम्बरमासारम्भे भविष्यति। स्पर्धा कस्मिन् राज्ये कुत्र भविष्यतीति पश्चात् घोषणा भविष्यति।

# नियमावलिः ( 2010तमवर्षस्य कृते )

### I. भाषणस्पर्धा

| क्र.सं | स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | पुरस्कारः |
|---|---|---|---|
| 1. | **व्याकरणभाषणम्** | • पारम्परिकसंस्कृतशिक्षणसंस्थासु आचार्यकक्षायाम् अथवा तत्समकक्षायाम् अधीयानाः छात्राः।<br>• यस्मिन् राज्ये तत्तद्विषयेषु आचार्यस्तरे पारम्परिकसंस्कृतपाठशालासु अध्ययनव्यवस्था नास्ति तस्माद् राज्यात् शास्त्रि/तत्समकक्षायाम् अन्तिमवर्षे अधीयानाः छात्राः भागं ग्रहीतुमर्हन्ति।<br>• आचार्यस्तरे शास्त्रविशेषे अध्यापनव्यवस्था अस्ति, किन्तु अस्मिन् वर्षे अमुकशास्त्रे छात्राः न सन्ति इति स्थितौ तस्मिन् शास्त्रे भाषणस्पर्धायां शास्त्रिकक्षायाः अन्तिमवर्षच्छात्राः भागं ग्रहीतुम् अर्हन्ति।<br>• प्रतिराज्यं/प्रति-स्पर्धालुगणम् एकस्मिन् विषये (शास्त्रे) भाषणस्पर्धायाम् एकः एव स्पर्धालुः भागं ग्रहीतुमर्हति।<br>• एकः स्पर्धालुः भाषणेषु एकस्मिन् विषये एव भागं ग्रहीतुमर्हति अर्थात् एकः स्पर्धालुः शास्त्रद्वये भाषणस्पर्धायां भागग्रहणाय नानुमन्यते।<br>• भाषणाय विषयाः चतुर्विंशतेः (24) होराभ्यः पूर्वं स्पर्धास्थले घोषिताः भविष्यन्ति।<br>• भाषणाय षट्-निमेषात्मकः कालः दीयते। [(5+1) पञ्चनिमेषाणामन्ते सूचना दीयते। तदनन्तरम् एकनिमेषाभ्यन्तरे भाषणम् उपसंहरणीयम्।]<br>• भाषणानन्तरं निर्णायकाः प्रश्नान् पृच्छेयुः।<br>• यदि निर्णयकाले अकस्मात् प्रथमद्वितीयतृतीयस्थानेषु प्रत्येकं स्थाने उभयोः स्पर्धाल्वोः बहूनां स्पर्धालूनां वा समाङ्काः आयान्ति तर्हि [ अर्थात् प्रथमस्थान/ द्वितीयस्थान/तृतीयस्थान-द्वये बहुले वा सति] तयोरन्यतरचयनाय/ तेषामन्यतमचयनाय (समाङ्कभञ्जनाय) पुनःस्पर्धा तत्क्षणमेव (आशुभाषणस्पर्धा) आयोज्येत। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br><br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br><br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |
| 2. | **साहित्यभाषणम्** | | |
| 3. | **न्यायभाषणम्** | | |
| 4. | **साङ्ख्य-योगभाषणम्** | | |
| 5. | **मीमांसाभाषणम्** | | |
| 6. | **वेदान्तभाषणम्** | | |
| 7. | **धर्मशास्त्रभाषणम्** | | |
| 8. | **ज्यौतिषभाषणम्** | | |

अनुवर्तते....

## II. शलाकापरीक्षा

| क्र.सं | स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | पुरस्कारः |
|---|---|---|---|
| 9. | **साहित्यशास्त्रशलाकापरीक्षा**<br>काव्यप्रकाशे 5-10 उल्लासाः | • पारम्परिकसंस्कृतशिक्षणसंस्थासु शास्त्रिकक्षायां/आचार्यकक्षायां/तत्समकक्षायां/गुरुकुले वा अधीयानाः छात्राः। (गुरुकुले अधीयानानां वयोमितिः 01-01-2010तमे दिनाङ्के 28 वर्षाणि)<br>• एकस्मिन् शास्त्रे एकस्मात् राज्यात् (प्रति-स्पर्धालुगणम्) एकस्यैव अवसरः।<br>• एकस्य छात्रस्य एकस्मिन् शास्त्रे एव स्पर्धायाम् अवसरः कल्प्यते।<br>• भाषणस्पर्धायां कण्ठपाठस्पर्धायां वा यः भागं गृह्णाति सः अत्र भागग्रहणं नार्हति।<br>• शलाकापरीक्षाविधानविषये विवरणं संलग्ने पत्रे (अनुलग्नकं 'क' इत्यत्र) अवलोकनीयम् | **उत्तीर्णेषु प्रथम/द्वितीय/तृतीय- स्थानभाजां कृते पुरस्कारः–**<br>I. स्वर्णपदकम् + स्वर्णशलाका + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम्+3000/- रूप्यकाणि च।<br>सर्वेभ्यः उत्तीर्णेभ्यः प्रमाणपत्राणि।<br>उत्तीर्णतामानदण्डः/श्रेणीनिर्धारणम् इत्थम्–<br>• 80% अङ्काः, तदुपरि च विशिष्टश्रेणी+रु. 2000/-<br>• 65% अङ्काः, तदुपरि च प्रथमश्रेणी+रु. 1500/-<br>• 60% तदुपरि च 64% पर्यन्तम् उत्तीर्णताप्रमाणपत्रमात्रम्। |
| 10. | **व्याकरणशलाकापरीक्षा**<br>वाक्यपदीपे ब्रह्मकाण्डम् | | |
| 11. | **न्यायशलाकापरीक्षा**<br>न्यायसिद्धान्तमुक्तावल्याम् अनुमानखण्डात् गुणखण्डं यावत् | | |
| 12. | **सिद्धान्तज्योतिषशलाकापरीक्षा**<br>सूर्यसिद्धान्ते चन्द्रग्रहणाधिकारात् ग्रन्थसमाप्तिं यावत् | | |
| 13. | **वेदान्तशलाकापरीक्षा**<br>ब्रह्मसूत्रशाङ्करभाष्ये चतुस्सूत्रेः अग्रे प्रथमाध्यायान्तं यावत् | | |
| 14. | **पुराणेतिहासशलाकापरीक्षा**<br>रामायणे सुन्दरकाण्डम् | | |

## III. कण्ठपाठस्पर्धा

| क्र.सं | स्पर्धायाः नाम | भागग्रहणाय अर्हाः/अर्हता | पुरस्कारः |
|---|---|---|---|
| 15. | **काव्यकण्ठपाठः**<br>नैषधे आदिमाः चत्वारः सर्गाः | • पारम्परिकसंस्कृतशिक्षणसंस्थासु प्राक्शास्त्री/मध्यमा-तत्समकक्षायाम्/गुरुकुले अधीयानाः छात्राः।<br>• प्रतिराज्यं/प्रति-स्पर्धालुगणम् एकस्य एव अवसरः।<br>• भाषणस्पर्धायां/शलाकापरीक्षायां वा यः भागं गृह्णाति सः अत्र भागं ग्रहीतुं नार्हति। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम्+3000/- रूप्यकाणि च। |
| 16. | **अष्टाध्यायीकण्ठपाठः**<br>(सम्पूर्णा अष्टाध्यायी) | • पारम्परिकसंस्कृतशिक्षणसंस्थासु प्राक्शास्त्रिकक्षायां/शास्त्रिकक्षायां/आचार्यकक्षायां/तत्समकक्षायां वा अधीयानाः छात्राः।<br>• प्रतिराज्यं प्रति-स्पर्धालुगणम् एकस्यैव अवसरः।<br>• अस्यां स्पर्धायां सकृत् (कस्मिंश्चित् वर्षे) स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय न अनुमन्यते। | |

अनुवर्तते....

| | | | |
|---|---|---|---|
| 17. | **अमरकोषकण्ठपाठः**<br>**( सम्पूर्णः अमरकोषः )** | • पारम्परिकसंस्कृतशिक्षणसंस्थासु प्राक्शास्त्री/ मध्यमा-तत्समकक्षायाम् अधीयानाः छात्राः<br>• प्रतिराज्यं/प्रति-स्पर्धालुगणम् एकस्य अवसरः।<br>• अस्यां स्पर्धायां सकृत् (कस्मिंश्चित् वर्षे) स्वर्णपदकेन पुरस्कृतः अनन्तरवर्षेषु पुनः अस्यां स्पर्धायां भागग्रहणाय न अनुमन्यते। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |

| **IV. समस्यापूर्तिः अन्त्याक्षरी च** | | | |
|---|---|---|---|
| 18.<br><br>19. | **समस्यापूर्तिः**<br><br>**अन्त्याक्षतरी** | • समस्यापूर्तौ अन्त्याक्षर्यां च प्रत्येकस्मात् राज्यात् आगतस्पर्धालुगणस्य सर्वे सदस्याः भागं ग्रहीतुमर्हन्ति। अर्थात् भाषणस्पर्धायां/अष्टाध्यायीकण्ठपाठे/काव्यकण्ठपाठे/ अमरकोषकण्ठपाठे च ये भागं गृह्णन्ति ते अपि समस्यापूर्तौ अन्त्याक्षर्यां च भागं ग्रहीतुमर्हन्ति।<br>• समस्यापूर्तिनिमित्तं समस्यात्रयम् स्पर्धास्थाने उद्घोष्यते। अर्धघण्टाकाले प्रत्येकं स्पर्धार्थिना समस्याद्वयं पूरणीयम् (दत्तपङ्क्तिमुपयुज्य श्लोकरचना कर्तव्या)<br>• अन्त्याक्षर्याम् अधोनिर्दिष्टग्रन्थेभ्यः एव श्लोकाः स्वीकरणीयाः– 1. रघुवंशम्, 2. कुमारसम्भवम्, 3. किरातार्जुनीयम्, 4. अभिज्ञानशाकुन्तलम्, 5. विक्रमोर्वशीयम्, 6. मालाविकाग्निमित्रम्, 7. मेघदूतम्, 8. नैषधीयम्, 9. उत्तररामचरितम्, 10. शिशुपालवधम्। एतेभ्यः ग्रन्थेभ्यः सर्वे श्लोकाः स्वीकर्तुं शक्यन्ते। | I. स्वर्णपदकम् + 7000/- रूप्यकाणि च।<br>II. रजतपदकम् + 5000/- रूप्यकाणि च।<br>III. कांस्यपदकम् + 3000/- रूप्यकाणि च। |

- आहत्य प्रतिराज्यं/प्रति-स्पर्धालुगणं नवदश स्पर्धालवः [शलाकायां-6, भाषणे-8, काव्यकण्ठपाठ-अष्टाध्यायी-अमरकोषकण्ठपाठ-समस्यापूर्ति-अन्त्याक्षरी-स्पर्धासु एकैकः आहत्य 19] अखिलभारतीयायां शास्त्रीयस्पर्धायां भागं ग्रहीतुमर्हन्ति।
- उपर्युक्तासु स्पर्धासु प्रत्येकं स्पर्धायां निर्णयकाले प्रथम-द्वितीय-तृतीयस्थानेषु प्रत्येकं स्थाने यदि द्वयोः स्पर्धाल्वोः बहूनां वा समाङ्काः आयान्ति तर्हि तयोः स्पर्धाल्वोः/तेषां स्पर्धालूनां समाङ्कभञ्जनाय पुनः स्पर्धा (आशुस्पर्धा) आयोज्येत।
- राज्यस्तरीयस्पर्धासु चिताः अर्हाः अखिलभारतीयायां स्पर्धायां भागं ग्रहीष्यन्ति। राज्यस्तरीयस्पर्धा कदा, कुत्र भविष्यतीति स्पष्टसूचना पश्चात् प्रकट्यते।

◆◆◆

**राष्ट्रियसंस्कृतसंस्थानम्, नवदेहली**

**४८तमा अखिलभारतीया शास्त्रीया स्पर्धा-2010**

# शलाकापरीक्षाविधानम्

शलाकापरीक्षायां निर्दिष्टग्रन्थम् अधीतवतः प्रत्येकस्य स्पर्धालोः परीक्षणं त्रिधा क्रियते–

I. स्मृतिबल/धारणाशक्ति–परीक्षणम्

II. ग्रन्थपङ्क्तेः व्याख्यानसामर्थ्यपरीक्षणम्

III. विशिष्टज्ञानपरीक्षणम्/शास्त्रचर्चा/गाढपरीक्षणम्

**I. प्रथमः घट्टः** ( स्मृतिबल/धारणाशक्ति–परीक्षणम्)

- परीक्षकैः शलाकया उद्धृतात् स्थानात् एका ग्रन्थपङ्क्तिः उच्चार्यते। ततः आरभ्य छात्रेण अग्रिमपङ्क्तयः श्रावणीयाः (परीक्षकाः यावत् श्रोतुमिच्छन्ति तावत्पर्यन्तम्)
- परीक्षकेषु एकैकः अपि एकस्य छात्रस्य एतादृशपरीक्षणम् अन्यूनं त्रिवारं कुर्यात्। [स्पर्धार्थिसंख्याम्, समयं च अनुसृत्य परीक्षकाः ततोऽधिकप्रश्नान् अपि कर्तुमर्हन्ति।]
- प्रतिवारमपि परीक्षकैः शलाकया एव प्रश्नस्थानानि उद्घाटनीयानि।

**II. द्वितीयः घट्टः** ( व्याख्यानसामर्थ्यपरीक्षणम्)

- परीक्षकैः शलाकया उद्घाटितस्थानात् ग्रन्थपङ्क्तिरेका उच्चार्यते। तस्याः पङ्क्तेः विशदं व्याख्यानं छात्रः कुर्यात्। छात्रस्य एतादृशं परीक्षणं एकैकः अपि परीक्षकः अन्यूनं त्रिवारं कुर्यात्। परीक्षकैः प्रतिवारं शलाकया प्रश्नस्थानानि चेतव्यानि।

**III. तृतीयः घट्टः** ( विशेषावगतिपरीक्षणम्/गाढज्ञानपरीक्षणम्)

- परीक्षकाः शलाकया उद्धृते स्थाने विद्यमाने विषये गहनप्रश्नान् कुर्युः। छात्रेण सह शास्त्रचर्चां कुर्युः। छात्रेण प्रदत्तसमाधानमनुसृत्य उपप्रश्नान् अपि परीक्षकाः कर्तुमर्हन्ति येन छात्रस्य ग्रन्थावगतेः स्तरः निर्णीतः भवेत्। एकवारं कृत-प्रश्नोपप्रश्न-शास्त्रचर्चादीनां समाधानात् परं पुनः शलाकया ग्रन्थमुद्घाट्य द्वितीयवारम् एवमेव प्रश्नोपप्रश्नचर्चादिकं भवेत्। अनया रीत्या तृतीयवारं, चतुर्थवारं/पञ्चमवारं च परीक्षकाः प्रश्नान् कुर्युः।